## पारस्करप्रभृतीनि च सञ्ज्ञायाम्। (१५७/१०७१)

पारस्करप्रभृतीनि च शब्दरूपाणि निपात्यन्ते सञ्ज्ञायां विषये। पारस्करो देशः। कारस्करो वृक्षः। [1]रथस्पा नदी। किष्कुः प्रमाणम्। किष्किन्धा गुहा। 'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' (ग. सू. १६०)। तस्करश्चोरः। बृहस्पतिर्देवता। चोरदेवतयोः इति किम्? तत्करः। बृहत्पतिः। [2]सञ्ज्ञाग्रहणादुपाधिपरिग्रहे सिद्धे गणे चोरदेवताग्रहणं प्रपञ्चार्थम्। 'प्रात्तुम्पतौ गवि कर्तरि' (ग. सू. १६१)। तुम्पतौ धातौ प्रशब्दात् [3]परः सुट् भवति गवि कर्तरि। प्रस्तुम्पति गौः। गवि इति किम्? प्रतुम्पति वनस्पतिः। पारस्करप्रभृतिराकृतिगणः। अविहितलक्षणः सुट् पारस्करप्रभृतिषु द्रष्टव्यः। प्रायश्चित्तम्। प्रायश्चित्तिः। यदुक्तं 'प्रायस्य चितिचित्तयोः सुडस्कारो वा' (म. भा. ३. ९६) इति तत्सङ्गृहीतं भवति॥

## अनुदात्तं पदमेकवर्जम्। (१५८/३६५०)

परिभाषेयम् स्वरविधिविषया। यत्रान्यः स्वरः उदात्तः स्वरितो वा विधीयते, तत्रानुदात्तं [4]पदमेकं वर्जयित्वा भवति इत्येतदुपस्थितं द्रष्टव्यम्। अनुदात्ताच्कम् अनुदात्तम्। कः पुनरेको वर्ज्यते? यस्यासौ [5]स्वरो विधीयते। [6]वक्ष्यति – [7]धातोः (६. १. १६२/३६७१) अन्तः उदात्तो भवति। गोपायति। धूपायति। धातोरन्त्यमचं वर्जयित्वा परिशिष्टमनुदात्तं भवति। धातुस्वरं श्नाश्वरो बाधते। [8]लुनाति। पुनाति। श्नाश्वरं तस्स्वरः। लुनीतः। पुनीतः। तस्स्वरमाम्स्वरः। लुनीतस्तराम्। पुनीतस्तराम्।

आगमस्य विकारस्य प्रकृतेः प्रत्ययस्य च।
पृथक्स्वरनिवृत्त्यर्थमेकवर्जं पदस्वरः॥ (म. भा. ३. ९७)

आगमस्य – 'चतुरनडुहोरामुदात्तः' (७. १. ९८/३३१)। चत्वारः। अनड्वाहः। आगमस्वरः प्रकृतिस्वरं बाधते। विकारस्य – अस्थनि, दधनि इत्यनङ्स्वरः (७.१.७५/३२२२) प्रकृतिस्वरं बाधते। प्रकृतेः – गोपायति। धूपायति। प्रकृतिस्वरः प्रत्ययस्वरं बाधते। प्रत्ययस्य – कर्तव्यम्। [9]हर्तव्यम्। प्रत्ययस्वरः प्रकृतेः स्वरस्य बाधकः।

परनित्यान्तरङ्गापवादैः स्वरैर्व्यवस्था सतिशिष्टेन च। यो हि यस्मिन् सति शिष्यते स तस्य बाधको भवति। तथा हि–गोपायति इत्यत्र धातुस्वरापवादः प्रत्ययस्वरः, तेनैव धातुस्वरेण प्रत्ययान्तस्य धातोः सतिशिष्टत्वाद् बाध्यते। [10]कार्ष्णोत्तरासङ्गपुत्रः इत्यत्र[11] च समासस्वरापवादो बहुव्रीहिस्वरः सतिशिष्टेन[12] समासान्तोदात्तत्वेन बाध्यते। विकरणस्वरस्तु सतिशिष्टोऽपि सार्वधातुकस्वरं न बाधते। लुनीतः इति तस एव स्वरो भवति।

[६९६] [13]विभक्तिस्वरान्नञ्स्वरो बलीयान् इति वक्तव्यम्। (म. भा. ३. १००)

अतिस्रः इत्यत्र 'तिसृभ्यो जसः' (६. १. १६६/३७१३) इति सतिशिष्टोऽपि विभक्तिस्वरो नञ्स्वरेण बाध्यते।

---

1. रथस्था फ, रथष्या ह. 2. सञ्ज्ञाग्रहण एव फ. 3. परः नास्ति फ. 4. पदमेकवर्जम् इत्येतत् फ.ह. 5. उदात्तः स्वरितो वा इत्यधिकम फ. 6. अत्र इत्यधिकम् ब. 7. धातोः इति ह. 8. लुनाति नास्ति ब. ड. फ. 9. हर्तव्यम् नास्ति ग. 10. कृष्णोत्तरासङ्गपुत्रः ड. 11. अपि फ. 12. एव इत्यधिकम ब. ड. 13. विभक्ति– बाध्यते नास्ति ग.